श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री करुणाकराचार्येण विरचितम्

# ॥ नवनीतहनुमत् शतकम् ॥

## (॥ प्राभञ्जनिप्रास शतकम् ॥)

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri N. Ananthanarayana of Chennai for his help in the preparation of this document.

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ नवनीतहनुमत् शतकम् ॥

## 1. प्रारम्भप्रकरणम्

नवनीतमयं नौमि नवसंवत्सरे कपिम्।
नवमीजपदासक्तं नवव्याकृतिपण्डितम्॥ १ ॥

निषङ्गी नवनीतेन निषङ्गी स्वजनेषु च।
निषङ्गी यजुषां लक्ष्ये निषङ्गी क्षेमदोऽस्तु मे॥ २ ॥

नवनीतविलिप्ताङ्गो नवनीतविलेपनम्।
नवं चक्रे यदीयानां नवं मां तनुतादयम्॥ ३ ॥

नटढक्काजसूत्राणां स्फुटं वेत्ता गिरां मुनेः।
घटजस्य हृदं केतुपटस्थः क्षेमदोऽस्तु मे॥ ४ ॥

अनुमानवतां श्रेष्ठो हनुमानस्तु मे श्रियै।
मनुवंश्यहरेर्नाम्ना मनुमानिति विश्रुतः॥ ५ ॥

अञ्जनाभतनौ रक्तं अञ्जनातनयं भजे।
भञ्जनं द्विषतां धत्ते रञ्जनं स्वजनस्य यः॥ ६ ॥

रामाङ्गवर्णनं कृत्वा श्यामां रामस्य सुन्दरीम्।
भा-मा-पूर्णमुखीं चक्रे यो मां पायात् स मरुतिः॥ ७ ॥

बाहुवेगेऽतुलं लोके प्राहुर्यं स कपीश्वरः।
राहुमातुर्निहन्ता मां राहुकेतुभयादवेत्॥ ८ ॥

मन्देतरदयायुक्तं मन्दसोदरमन्त्रिणम्।
मन्दपीडानिवृत्यर्थं मन्दरेण समं भजे॥ ९ ॥

www.prapatti.com

आयुषाऽथ सुदीर्घेण वायुसूनुमलङ्कृतम्।
ना युतस्सेवमानस्स्यादायुषा महता भुवि॥ १० ॥

हेमाचलसमाकारं रामाङ्घ्रिरतमाश्रये।
सामादिवेदसारज्ञं सीमातीतयशोनिधिम्॥ ११ ॥

स पिता पवनो यस्य कपिवर्यश्च केसरी।
अपिवद्वचनं यस्य कपिसिंहस्स मामवेत्॥ १२ ॥

स्कन्दतातांशमूर्तिर्यो मन्दतातेन शिक्षितः।
कन्दुकीकृतकैलासनन्दनारिस्स मामवेत्॥ १३ ॥

वातात्मजातमीडेऽहं सीताशोकहरं कपिम्।
पातालाद्भवनाम्नो मां पाताऽस्ते यस्य विक्रमः॥ १४ ॥

करिराजगतौ मायानरि विष्णौ सदा रतः।
अरिनाशमसौ कृत्वा परिपातु कपिस्स माम्॥ १५ ॥

पलाशदण्डपाणिस्सन् पलाशनिधनं दधत्।
फलाशाक्ष्यसूर्योऽव्यात् मलान्याश्वपहृत्य माम्॥ १६ ॥

हरिपादरतो नित्यं हरिराजस्य मन्त्रिषु।
गरिमादिसुसिद्ध्याढ्यः हरिभक्तिं दधातु मे॥ १७ ॥

हस्ते भेषजगोत्रेन्द्रं हस्तिवक्त्रपितुः प्रियम्।
मस्तके च दधत् पायात् निस्तुलो मां कपीश्वरः॥ १८ ॥

नादागमरसज्ञोऽयं पादाब्जे ध्यायतस्सदा।
वेदाननस्य सर्वस्वं दाता मे नात्र संशयः॥ १९ ॥

वरुणालयमातीर्णः करुणामिव रूपिणीम्।
तरुमूले समासेवी कुरुतात् करुणां मयि॥ २० ॥

## 2. अच् - प्रकरणम्

अङ्गदादिनुतो दद्यात् मङ्गलं मारुतिर्मम।
रङ्गनाथरते तस्मिन् तुङ्गकीर्ती रतेस्सदा॥ २१ ॥

आनन्दं ब्रह्मणो विद्वान् सानन्दान् तनुतात् नतान्।
वीनं दमयतो वेगात् सानन्दो यस्य राघवः॥ २२ ॥

इनमीडे हरीन्द्रैस्तं पनसादिभिरानतम्।
वनवासरते सक्तं जनकस्य गिरा हरौ॥ २३ ॥

ईरयन्तं सदा रामतारकं तमहं भजे।
नीरधिं प्रसमुत्तिर्णं कीरवाण्याः कृते कपिम्॥ २४ ॥

उदये द्युमणिं स्वीये उदये ग्रसितुं प्लुतः।
हृदयं मेऽधिरूढस्सन् सदयं संप्रसीदतु॥ २५ ॥

ऊनकार्यरतात्तस्मात् हीनराक्षसपुङ्गवात्।
येन देव्युद्धुता चित्तं तेन मे नाथवत् सदा॥ २६ ॥

ऋक्षवृद्धवचोवृद्धः यक्षजातारिपौ रतः।
रक्षसां नाशको भूयाद्रक्षणाय सदा मम॥ २७ ॥

ॠणाति निजगानेन घोणाहरिसमाकृतिः।
वीणामुनेश्च जेताऽयं शोणायितहनुः कपिः॥ २८ ॥

एक एव समर्थो योऽशोककाननभञ्जने।
साकमेष मया भूयात् पाकचिन्ता हरन् मम॥ २९ ॥

ऐन्द्रशत्रुकपेर्मित्रं ऐन्द्रव्याकृतिवल्लभम्।
ऐन्द्रिकाकाक्षिहारीष्टं सान्द्रभक्तिरहं भजे॥ ३० ॥

ओघमेघस्स्वनो वाग्मी मेघनादरणेऽस्त्रजम्।
मोघमाकलयद्बन्धं राघवे भक्तिमान् कपिः॥ ३१ ॥

www.prapatti.com

औषधधाद्रिधरो जैत्रघोषदो ध्वजमास्थितः।
तोषदः पाण्डवानीके भीष्यन् कुरुवाहिनीम्॥ ३२॥

अं सदा भावयन्तं तं अंसदेशे निजे स्थितम्।
संसरत्तापहर्तारं तं सरण्युसुतं भजे॥ ३३॥

अ इत्यभिधया ख्याते स इन्धे भक्तिमान् कपिः।
अ-इ-उण् मुखसूत्राणां य इहैको रहस्यवित्॥ ३४॥

## 3. हल् - प्रकरणम्

कनकाचलसङ्काशः मनसा धृतराघवः।
पनसापूर्णकुक्षिर्मे धनमैन्द्रं ददातु सः॥ ३५॥

खगराजसमो वीर्यं खगसंपातिवाक्यतः।
सगरात्मजतामाप्तं गगनेन तरन्नवेत्॥ ३६॥

गतिमान् मतिमानेषु पतिदूतस्समागतः।
इति यो मानितो देव्या पतितं पालयेत् स माम्॥ ३७॥

घनमध्ये चरन् लङ्कावनमध्येऽथ जानकीम्।
घनदुःखादवन्पातु धनदानुजभीतिदः॥ ३८॥

ङादिशब्दं न जानेऽहं वेदिवह्निरिव ज्वलन्।
आदिमूलपदे सक्त! स्वादिमूलर्क्ष! रक्ष माम्॥ ३९॥

चयं सर्वकलानाञ्च जयं सर्वरणेष्वपि।
अयं चापि ददद्रक्षेत् अयं मां कपिपुङ्गवः॥ ४०॥

छायापतिविनेयोऽसौ मायानरि सदा रतः।
मायाः क्लेशहरो वाग्भिः पायादस्मानपायतः॥ ४१॥

जयं राघवसेनायां नयं वाचि निरन्तरम्।
श्रियं चाऽपि सदा भक्तेष्वयं दत्ते महाकपिः॥ ४२॥



www.prapatti.com

झषकूर्मादिरूपेषु तुषबुद्धिं ददत् स्वयम्।
सुषमां राघवस्यैष इषमातनुते मतेः॥ ४३॥

ञादिरस्ति पदं नैव मेदिनीतनयाकृते।
सूदिताऽशोकदाव त्वं वादिभीकर! रक्ष माम्॥ ४४॥

टङ्कहस्तकृतं पुण्यं टङ्कयत् हरता सदा।
कङ्कराजप्रियेणाहं अङ्कितस्वहृदं भजे॥ ४५॥

ठान्तं पादिं स्वयं छायाकान्तं नत्वाप्तवान् कपिः।
शान्तं रामं सदा ध्यायन् स्वान्तं भूषयतान्मम॥ ४६॥

डमरोरुदितं सूत्रं कमलस्याप्ततो भजन्।
अमलस्वान्तगम्भीरः मम शं तनुतां कपिः॥ ४७॥

ढालिवर्गं जयन् युद्धे मालिनं जम्बुपूर्वकम्।
वालिसोदरमन्त्री मां केलिमानवतात् कपिः॥ ४८॥

णान्तकाव्यमहाहारे भान्तमेनं महाकपिम्।
शान्तमेवं भजत् चित्तं नान्तमेति मुदो मम॥ ४९॥

तमसातीरवासी यं कमलादुःखहारिणम्।
तमसो दूरगं वक्ति नमसाऽहं वृणोमि तम्॥ ५०॥

थं तमौषधपूर्णं यः थं हरन् सुहृदामधात्।
थं ददत् भजतामेष थं परं भाति वानरः॥ ५१॥

दयानिधिमहं मान्यं नयानमाश्रयं श्रये।
मयात्मजापतौ येन भयावतरणं कृतम्॥ ५२॥

धनदानुजसैन्यं यो घनघोषेण भीषयन्।
वनमस्य बभञ्जसौ घनकान्तिरतो जयेत्॥ ५३॥

नगराजसुतातिथ्यं खगराजजवस्स्वयम्।
न गतो कार्यसक्तोऽसावगदोऽस्तु सदा मम॥ ५४॥

पलाशसैन्यहन्ताऽसौ कलासु कुशलः कपिः।
नलादिसुहृदामिष्टो मलानि नुदतान्मम॥ ५५॥

फलायते रविर्यस्य पलायन्ते निशाचराः।
बलाद्यस्य परं भीताः कलादक्षो विभाति सः॥ ५६॥

बलारिसुतहन्तुर्यो बलाधानपटुः कपिः।
स लाभाय भवेदस्मै शिलायुधधरः प्रभुः॥ ५७॥

भजतां क्षेमदो भक्त्या गजवक्त्रपितुः कपिः।
निजवीर्योदितो नित्यं गजसंपत्प्रदोऽस्तु मे॥ ५८॥

मनसोऽपि द्रुतं गच्छन् पनसादिभिरीडितः।
घनवर्णे रतो रामे मनसि स्तात्सदा मम॥ ५९॥

यक्षकन्या हता येन रक्षसां जातिमाश्रिता।
पक्षमस्य जयं नेता रक्षतान्मारुतिस्स माम्॥ ६०॥

रजनीशमुखं रामं गजतुल्यगतिं च यः।
सजयं कुरुते नित्यं भज तं वायुनन्दनम्॥ ६१॥

लवतातरतं नौमि लवणाब्धिं पुरा तरन्।
अवनं योऽतनोत्तस्या अवनीदुहितुः कपिः॥ ६२॥

वनजायतनेत्रं तं मनसा चिन्तयन् सदा।
कनकाचलसङ्काशो जनयेन्मम सद्गतिम्॥ ६३॥

शतयोजनविस्तीर्णं प्लुतमब्धिमहं ततः।
कृतराघवकैङ्कर्य स्तुतमीडेऽपि सीतया॥ ६४॥

षडङ्गानाप यो वेदान् फडं मत्वा वृतात् पुरा।
अडन्धीरहितं सोऽयं जडं मां पालयेत् कपिः॥ ६५॥

सवनादावशक्तोऽहं पवनात्मज! ते कृपाम्।
अवनायाश्रये दासः नवव्याकृतिपण्डित!॥ ६६॥

हलपद्धितिनाम्नाढ्यां खलरावणपीडिताम्।
अलमेकः परित्रातुं मलनाशाय मेऽप्यसौ॥ ६७॥

## 4. अङ्गवृत्तान्तप्रकरणम्

लङ्कारक्षकराक्षस्याश्शङ्कादायिभुजाबल!।
शङ्कादूरां शणेर्बुद्धिं शं काममपि च संपदम्॥ ६८॥

अक्षराक्षसतातादिवक्षोभेदकसद्भुज!।
अक्षरास्यवरं कृत्वा रक्ष मां पवनात्मज!॥ ६९॥

भुजसारसमानीतनिजपक्षजय! प्रभो!।
गजवक्त्रादिभिश्श्लाघ्य! भजतः कुरु मे दयाम्॥ ७०॥

भुजमूले पुरा धृत्वा गजतुल्यगती प्रभू।
भजतादिति सुग्रीवं भजमानमहं भजे॥ ७१॥

कार्यालये नराः केचित् वार्यादिसदृशाः स्थिताः।
आर्यालयानुकंपाया वार्यास्तान् बाधनान्मम॥ ७२॥

नार्यासक्तिर्न ते धीर! कार्याणां साधेन् क्षम!।
आर्यासक्ता सदा धीस्ते कार्यास्मिन् करुणा त्वया॥ ७३॥

पुच्छवह्निमुपादाय स्वच्छलङ्कापुरीं दहन्।
कच्छपं चादिमं वोढा यच्छतात् कुशलं मम॥ ७४॥

भेषजाद्रिभुजो भाति वेषमानुषसक्तधीः।
कोषपूरकवीक्षाढ्यो द्वेषलोभादिवारकः॥ ७५॥

तरुभञ्जनदक्षेन ह्युरुविक्रम! पाणिना।
कुरु भञ्जनमस्माकं करुणाकर! पाप्मनाम्॥ ७६॥

परपूर्दहने दक्ष! वरवाल! कपीश्वर!।
गरतुल्यानि पापानि हरतान्मामकान्यपि॥ ७७॥



www.prapatti.com

हरवीर्यसमुद्भूत! परसैन्यविनाशक!।
परस्वे परदारे च हर मे विक्षणादिकम्॥ ७८ ॥

गदया मण्डितः पाणिः सदया बुद्धिवृत्तयः।
मदमानविहीनास्ते गदहारी त्वमेव मे॥ ७९ ॥

मारुते स्खलनं ते नो ऊरुजातादिदर्शने।
चारुते वर्णितेत्याहुः चारु मे त्वं व्रतं कुरु॥ ८० ॥

अविनीता इमे धूर्ता अविनीताऽत्र ते स्थितिः ।
भवितेति क्षिपन्भाति सवित्रा गुरुमान् कपिः॥ ८१ ॥

विनतापौत्रवीर्याणि विनतापुत्रसारथौ।
विनतो वर्णयन्भाति विनते क्षेमदः कपिः॥ ८२ ॥

मण्डलं मम भित्त्वाऽगात् चण्डवेगस्स चाऽण्डजः।
पुण्डरीकाक्षदृष्ट्येति चण्डरश्मिवचो भजन्॥ ८३ ॥

वीर एष रतो नित्यं नीरजायतलोचने।
सूरशिष्यो नतं पातु शूरवर्याभिवन्दितः॥ ८४ ॥

धनुषा भूषिते सक्तो हनुमान् वारयेन्मम।
अनुयाताङ्गदो नित्यं अनुयाताङ्गना मतीः॥ ८५ ॥

हनुभूषणानामासौ तनुभूषणदर्शनात्।
ननु तद्दम्पती गोप्ता क्व नु तत्सदृशो भवेत्॥ ८६ ॥

ऋक्षराजवचोवृद्धो रक्षसां पुरमाश्रितः।
अक्षमुख्यरिपुध्वंसी रक्षणं तनुतान्मम॥ ८७ ॥

रामस्य चरितं प्रोच्य सामवाग् भरतं कपिः।
ग्रामं नन्दिमुखं प्राप्य क्षेमसंयुक्तमातनोत्॥ ८८ ॥

यथाऽयं प्रणतानस्मान् तथा वितनुतां सदा।
कथामेतां हृदि न्यस्य पथा यातोऽसतामपि॥ ८९ ॥



www.prapatti.com

अञ्जनाचलवासी च कञ्जनाभहरिर्हरिः।
अञ्जनागर्भसंभूतो भञ्जकौ पाप्मनां मम॥ ९०॥

अग्रीवान् राक्षसान् कृत्वा सुग्रीवप्रीतिकृत् कपिः।
सुग्रीवः पञ्चवक्त्रैर्मां सुग्रीवं तनुतां नतम्॥ ९१॥

गीतान् सारथिना सर्वान् श्रोताऽयं केनचित् कपिः।
सीतां श्रीरामवृत्तान्तैः पाता मां पातु सर्वदा॥ ९२॥

वातस्य तनयो लोके ताततुल्यबलः कपिः।
जात एष सदा रक्षेत् वातरोगादिमज्जनम्॥ ९३॥

## 5. अर्चामूर्तिप्रकरणम्

केसरिक्षेत्रजो वक्त्रे केसरीन्द्रं पुरो दधत्।
केसरीन्द्रौ निजास्येषु भासते नामपर्वते॥ ९४॥

नरसिंहे रतो नित्यं नरसिंहं पुरो दधत्।
पुरं चोलहरेः कुर्वन् वरं भाति वरप्रदः॥ ९५॥

विश्वरूपधरो भाति विश्वमङ्गलदः कपिः।
विश्वरक्षककेशानां विश्ववन्दितमन्दिरे॥ ९६॥

तुङ्गमूर्तिरयं भाति नङ्गनल्लूर्पुरे हरिः।
अङ्ग! वक्त्रे हरिं पश्यन् मङ्गलानि ददन्नते॥ ९७॥

द्वादशश्रीतनोः छात्रः द्वादशोऽनुचरैरयम्।
ता दशाननमाः हर्ता मे दयेत पुरीस्थितः॥ ९८॥

आधिव्याधिहरो देवः यो धिया भजतो मम।
साधितश्रीर्जलं दत्वा लोधिवीथ्यालयान्धुतः॥ ९९॥

आहरन् कूपपाथो मे मेहर्-चन्द्-स्वापणे स्थितः।
श्रीहरेः पार्श्वगो रक्षेत् श्रीहरिर्मारुतिस्सदा॥ १००॥

वैकुण्ठविमोखोऽप्येष वैकुण्ठपतिसेवकः।
वैकुण्ठसुखदो मेऽत्र वैकुण्ठकलिकल्मषः॥ १०१॥

इति करुणाकरकविना कलिते प्रासातिसुन्दरे शतके।
वैकुण्ठाधिपनिलये सेव्यो जुषतां स सुन्दरो नाम्ना॥ १०२॥

मङ्गलायतने सक्तं सुन्दरं प्रति निर्मितम्।
सुन्दरं शतकं दद्यात् मङ्गलं पठतामिदम्॥ १०३॥

रङ्गलक्ष्मणप्रत्तयाख्यया शास्त्रसाहितीवल्लभः कविः।
रङ्गलक्ष्मणाचार्यनिर्मितं गव्यलेपनं तं जगौ कपिम्॥ १०४॥

॥ इति नवनीतहनुमत् शतकं समाप्तम्॥

www.prapatti.com